# अन्ताराष्ट्रियदिव्याङ्गदिवसः – सुगम्यभारताभियानम्

वैश्विकस्तरे दिव्याङ्गानां (Persons with disabilities) अधिकार-कल्याण-स्वस्थतानां परिबृंहणार्थं United Nations General Assembly इत्यस्य 47/3 धारायां वर्षे एकवारं विश्वदिवाङ्गदिवसस्य (Interanational Day for Disabled Person) परिपालनाय नीतिः निर्धारिताऽस्ति । सन्दर्भेऽस्मिन् प्रतिवर्षमिव ऐषमोऽपि राष्ट्रियसंस्कृतविद्यापीठस्य प्राङ्गणे 03.12.2018 दिनाङ्के दिवसमहोत्सवममुं पुरस्कृत्य **"सुगम्य- भारताभियानम्"** (Accessible India Campaign) इति कार्यक्रमः पर्यपाल्यत । कार्यक्रमेऽस्मिन् समागताः मुख्यातिथयः शैक्षिकसङ्घायप्रमुखाः आचार्य आर्.एल्.नरसिंहशास्त्रिमहाभागाः भारतस्य प्रसिद्धानां चतुर्दश दिव्याङ्गानां सुधाचन्द्रन्-गिरीशशर्म-शेखरनायक-प्रीतिश्रीनिवासन्-सतेन्द्रसिंह-रामकृष्णन्-साईप्रसादविश्वनाथन्-आकवरखानप्रमुखानामुदाहरणानि प्रदर्श्य प्राचोदयन् यत् दिव्याङ्गत्वबोधः केवलं मानसविचार एव, अत्र केवलमेकस्यैव शारीरिकाङ्गस्याक्षमत्वं सिद्ध्यति, न मानसिकभावनायाः न्यूनता स्यात् ; अनेन आत्मबलहीनताबोधः न स्यात्, दृढभावनया कार्यं कृत्वा सर्वेऽपि विश्वविजयिनो भवितुमर्हन्ति इति । सन्दर्भेऽस्मिन् विद्यापीठे कार्यरतानां रमेश-ईश्वरकुमार-प्रमुखानां दिव्याङ्गानां यथोचितसम्माननम् अक्रियत । आचार्य चक्रवर्तिराघवन्महोदयाः कार्यक्रमस्यास्य संयोजकाः आसन् । अन्ये च विद्यापीठस्य सर्वेऽप्यध्यापकाः आचार्याः, छात्राः उपस्थिता आसन् । डॉ.आर्.चन्द्रशेखरमहोदयाः आतिथ्यं निरवहन् ।







दक्षिणा वि सिन्धुरिव पप्रथे - ऋ.१०.६२.९ :: The power of giving expands like an ocean